# Gayatri Ramayana 2

# ગાયત્રીરામાયણમ્ ૨

## Document Information

Text title : gAyatrIrAmAyaNa by Vidyaranya as mentioned in rAmAyaNarahasya

File name : gAyatrIrAmAyaNa2.itx

Category : raama, devii, devI

Location : doc_devii

Author : Vidyaranya (Different than Swami Vidyaranya)

Transliterated by : Venkata Subramanian venkatasubr at gmail.com

Proofread by : Venkata Subramanian, Sunder Hattangadi

Description/comments : From Valmiki and Sankshepa Ramayanam

Latest update : February 24, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# ગાયત્રીરામાયણમ્ ૨

(ગાયત્રીમન્ત્ર અક્ષરાણાં(વર્ણાનાં) શ્રીમદ્ વાલ્મીકિરામાયણે સઙ્ક્શેપરામાયણે પ્રદર્શિતાઃ)

શ્રીમદ્ બાલકાણ્ડે પ્રથમસર્ગાદૌ - ૧-૧-૧
તપઃસ્વાધ્યાયનિરતં તપસ્વી વાગ્વિદાં વરમ્ । (અત્ર તકારઃ ગાયત્રી પ્રથમાક્ષરમ્- ત)
નારદં પરિપપ્રચ્છ વાલ્મિકિર્મુનિપુઙ્ગવમ્ ॥ ૧॥

શ્રીમદ્ બાલકાણ્ડે ત્રિંશે સર્ગે -૧-૩૦-૧૮(૧૯)
સ તેન પરમાસ્ત્રેણ માનવેન સમાહતઃ । (અત્ર સકાર ગાયત્રી દ્વિતીયક્ષરં -સ)
સમ્પૂર્ણં યોજનશતં ક્ષિપ્તઃ સાગરસમ્પ્લવે ॥ ૨॥

શ્રીમદ્ બાલકાણ્ડે ત્રિષષ્ટિતમે સર્ગે -૧-૬૩-૩ -૪
વિશ્વામિત્રો મહાતેજા ભૂયસ્તેપે મહાતપાઃ । (અત્રતૃતીયાક્ષરં -વિ)
તતઃ કાલેન મહતા મેનકા પરમાપ્સરઃ ॥ ૩॥

અયોધ્યા કાણ્ડે ચતુર્દશે સર્ગે -૨-૧૪-૩૬
ચતુરશ્વો રથઃ શ્રીમાન્ નિસ્ત્રિંશો ધનુરુત્તમમ્ । (અત્રચતુર્થાક્ષં - તુ)
વાહનં નરસંયુક્તં છત્રં ચ શશિસન્નિભમ્ ॥ ૪॥

અયોધ્યા કાણ્ડે ચતુશ્ચત્વારિંશે સર્ગે- ૨-૪૪-૫
વર્તતે ચોત્તમાં વૃત્તિં લક્ષ્મણોઽસ્મિન્ સદાઽનઘઃ । (અત્રગાયત્ર્યા પઞ્ચમાક્ષરં -વ)
દયાવાન્ સર્વભૂતેષુ લાભસ્તસ્ય મહાત્મનઃ ॥ ૫॥

અયોધ્યા કાણ્ડે એકસપ્તતિતમે સર્ગે -૨-૭૧-૩૩
દ્વારેણ વૈજયન્તેન પ્રાવિશચ્છ્રાન્તવાહનઃ । (અત્રરે ઇતિ ષષ્ટાક્ષરં - રે)
દ્વાઃસ્થૈરુત્થાય વિજયં પૃષ્ટસ્તૈઃ સહિતો યયૌ ॥ ૬॥

અયોધ્યા કાણ્ડે એકોનશતતમે સર્ગે -૨-૯૯-૨૫
ઉટજે રામમાસીનં જટામણ્ડલધારિણમ્ । (અત્રપ્રથમે પાદે સપ્તમાક્ષરં - ણ)
તં તુ કૃષ્ણાજિનધરં ચીરવલ્કલવાસસમ્ ॥ ૭॥

આરણ્ય કાણ્ડે દ્વાદશે સર્ગે ૩ -૧૨-૪

તે વયં વનમત્યુગ્રં પ્રવિષ્ટાઃ પિતૃશાસનાત્ । (અત્રાષ્ટમાક્ષરં - યં)
દ્રષ્ટુમિચ્છામહે સર્વે ભગવન્તં નિવેદ્યતામ્ ॥ ૮॥

આરણ્ય કાણ્ડે સપ્તચત્વારિંશે સર્ગે ૩-૪૭-૧૦
મમ ભર્તા મહાતેજા વયસા પઞ્ચવિંશકઃ । (અત્રનવમાક્ષરં - ભ)
અષ્ટાદશ હિ વર્ષાણિ મમ જન્મ ન ગણ્યતે ॥ ૯॥

શ્રીમત્કિષ્કિન્ધા કાણ્ડે ચતુર્થે સર્ગે ૪-૪-૩
તતઃ પરમસંહૃષ્ટો હનુમાન્ પ્લવગર્ષભઃ । (અત્ર દશમાક્ષરં -ગ)
પ્રત્યુવાચ તતો વાક્યં રામં વાક્યવિશારદઃ ॥ ૧૦॥

શ્રીમત્કિષ્કિન્ધા કાણ્ડે એકત્રિંશે સર્ગે ૪-૩૧-૧
સકામિનં દીનમદીનસત્ત્વં શોકાભિપન્નં સમુદીર્ણકોપમ્ । (અત્ર ગાયત્ર્યા એકાદશાક્ષરં - દે)
નરેન્દ્રસૂનુર્નરદેવપુત્રં રામાનુજઃ પૂર્વજમિત્યુવાચ ॥ ૧૧॥

શ્રીમત્સુન્દરકાણ્ડે પ્રથમસર્ગાદૌ ૫-૧-૧
તતો રાવણનીતાયાઃ સીતાયાઃ શત્રુકર્શનઃ । (અત્રગાયત્ર્યા દ્વાદશાક્ષરં- વ)
ઇયેષ પદમન્વેષ્ટું ચારણાચરિતે પથિ ॥ ૧૨॥

શ્રીમત્સુન્દરકાણ્ડે સપ્તવિંશે સર્ગે ત્રિજટાસ્વપ્ને ૫-૨૭-૧૩
તતસ્તસ્ય નગસ્યાગ્રે આકાશસ્થસ્ય દન્તિનઃ । (અત્રગાયત્ર્યા ત્રયોદશાક્ષરં - સ્ય)
ભર્ત્રા પરિગૃહીતસ્ય જાનકી સ્કન્ધમાશ્રિતા ॥ ૧૩॥

શ્રીમત્સુન્દરકાણ્ડે ષટ્ચત્વારિંશે સર્ગે ૫-૪૬-૧૦
નાવમાન્યો ભવદ્ભિશ્ચ હરિર્ધીરપરાક્રમઃ । (અત્રગાયત્ર્યા ચતુર્દશાક્ષરં - ધી)
દૃષ્ટા હિ હરયઃ સર્વે મયા વિપુલવિક્રમાઃ ॥ ૧૪॥

શ્રીમદ્યુદ્ધકાણ્ડે પ્રથમસર્ગાદૌ ૬-૧-૧
શ્રુત્વા હનુમતો વાક્યં યથાવદભિભાષિતમ્ । (અત્રગાયત્ર્યા પઞ્ચદશાક્ષરં -મ)
રામઃ પ્રીતિસમાયુક્તો વાક્યમુત્તરમબ્રવીત્ ॥ ૧૫॥

શ્રીમદ્યુદ્ધકાણ્ડે અષ્ટાવિંશેસર્ગે ૬-૨૮-૨૬ -૨૭ રાવણં પ્રતિ શુકઃ
રક્ષોગણપરિક્ષિપ્તો રાજા હ્યેષ વિભીષણઃ । (અત્રગાયત્ર્યા ષોડશાક્ષરં - હિ)
શ્રીમતા રાજરાજેન લઙ્કાયામભિષેચિતઃ ॥ ૧૬॥

શ્રીમદ્યુધ્દકાણ્ડે પઞ્ચાશેસર્ગે નાગપાશવિમોચનસમયે ૬-૫૦-૪૦
તેજો વીર્યં બલં ચૌજ ઉત્સાહશ્ચ મહાગુણાઃ । (અત્રગાયત્ર્યાઃસપ્તદશાક્ષરં -ધી (ધિ))
પ્રદર્શનં ચ બુદ્ધિશ્ચ સ્મૃતિશ્ચ દ્વિગુણં તયોઃ ॥ ૧૭॥

શ્રીમદ્યુધ્દકાણ્ડે અષ્ટષષ્ટિતમેસર્ગે ૬-૬૮-૧
કુમ્ભકર્ણં હતં દૃષ્ટ્વા રાઘવેણ મહાત્મના । (અત્રગાયત્ર્યાઃઅષ્ટાદશાક્ષરં -ય (યો))
રાક્ષસા રાક્ષસેન્દ્રાય રાવણાય ન્યવેદયન્ ॥ ૧૮॥

શ્રીમદ્યુધ્દકાણ્ડે એકાશીતિતમેસર્ગે ૬-૮૧-૧
વિજ્ઞાય તુ મનસ્તસ્ય રાઘવસ્ય મહાત્મનઃ । (અત્રગાયત્ર્યાઃ એકોનવિંશતિતમાક્ષરં- ય)
સન્નિવૃત્યાહવાત્તસ્માત્પ્રવિવેશ પુરીં તદા (તતઃ) ॥ ૧૯॥

શ્રીમદ્ યુધ્દકાણ્ડે દ્વાદશશતતમેસર્ગે ૬-૧૧૨-૨૫ (ગીતાપ્રેસ્ ૬-૧૧૧-૧૦૦)
મરણાન્તાનિ વૈરાણિ નિર્વૃત્તં નઃ પ્રયોજનમ્ । (અત્રગાયત્ર્યાઃ વિંશતિતમાક્ષરં -નઃ)
ક્રિયતામસ્ય સંસ્કારો મમાપ્યેષ યથા તવ ॥ ૨૦॥

ઉત્તરશ્રીરામાયણે પ્રથમસર્ગાદૌ ૭-૧-૧
પ્રાપ્તરાજ્યસ્ય રામસ્ય રાક્ષસાનાં વધે કૃતે । (અત્રગાયત્ર્યાઃએકવિંશાક્ષરં - પ્ર)
આજગ્મૂ ઋષયઃ સર્વે રાઘવં પ્રતિનન્દિતુમ્ ॥ ૨૧॥

ઉત્તરશ્રીરામયણે દ્વાવિંશેસર્ગે ૭-૨૨-૭(૮)
તતઃપ્રાચોદયત્સૂતસ્તાન્હયાન્રુધિરપ્રભાન્ । (અત્ર ગાયત્ર્યાઃ દ્વાવિંશાક્ષરં- ચો)
??tataH prAchodayatsUtastaanhayAnnuchiraprabhAn?
પ્રયયૌ ભીમસન્નાદો યત્ર રક્ષપતિઃ સ્થિતઃ ॥ ૨૨॥

ઉત્તરશ્રીરામાયણે એકચત્વારિંશાદૌ ૭-૪૧-૧
વિસૃજ્ય ચ મહાબાહુઃ ઋક્ષવાનરરાક્ષસાન્ । (અત્રગાયત્ર્યાઃ ત્રયોવિંશાક્ષરં -દ)
ભ્રાતૃભિઃ સહિતો રામઃ પ્રમુમોદ સુખં સુખી ॥ ૨૩॥

ઉત્તરશ્રીરામાયણે ષટ્સપ્તતિત,એસર્ગે ૭-૭૬-૨૭ -૨૮
બ્રાહ્મણસ્ય ચ ધર્મેણ ત્વયા વૈ જીવિતઃ સુતઃ । (અત્રગાયત્ર્યાઃચતુર્વિંશાક્ષરં -યા)
ઉષ્યતાં ચૈવ રજનીં સકાશે મમ રાઘવ ॥ ૨૪॥

This Gayatri Ramayana, as proposed by Vidyaranya in the text
rAmAyaNarahasyamvidyAraNya, is different than commonly conveyed
based on the first letter of the shlokas chosen. In the commentary
of rAmAyaNarahasyam, it is mentioned that these verses are
in the Sankshepa Ramayanam.
The numbers correspond to sarga.adhyAya.shloka.

Encoded and proofread by Sunder Hattangadi

*Gayatri Ramayana 2*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*